ण ममदाहृते विशेषस्तु मरीचिं विश्वतवर्णे सप्तवार्च्यः विवस्वन्तं रक्ते मित्रं स्वर्णाभं भूधरे कृष्णे सवितारं नीले सावित्रं श्वेते इन्द्र
पद्मगणे इन्द्रजयं श्वेते रुद्रं प्रवालाभं रुद्रजयं पीते अपं धवले आपवत्सं केसराभे ईशाने धवले पर्जन्यं जपाभे जयन्तं मेचकाभे
महेन्द्रं ममलकान्ति आदित्यं रक्ते सत्यं चित्रवर्णं भृशं धूम्राभे अन्तरिक्षं कुन्दाभे अग्निं पद्मरागाभे पूषणं रक्ताभे वितथं
सिन्दूराभं गृहक्षतं रक्ते विष्णुदाभे यमं मेचकाभे गन्धर्वं पद्मरागाभे भृङ्गराजं भ्रमराभे मृगं मेचकाभे निर्ऋतिं पावकाभे दौवारिकं
पीते सुग्रीवं नीलकण्ठाभे पुष्पदन्तं वज्राभे वरुणं स्फटिकाभे असुरं भृङ्गाभे शोषं धूम्राभे रोगं सिन्दूरनीलाभे वायुं कृष्णाभे

मे॰र
त्रा॰
२०

नागे शंखेंदुसन्निभे मुख्ये मौक्तिकाभे भल्लाटे श्वेतपद्माभे सोमे स्फटिकाभे अर्गले रक्तोत्पलाभे दिति कुंदेंदुधवले अदितिक
पिलो चरकी शोणाभा विदारी पावकद्युति पूतना हिमाभा पिलपिच्छकी मेचकाभा शर्वे श्वेते गुहे रक्ते अर्यमणि पीते जंभके कृष्ण
वर्णे ध्यात्वा पूजयेत् अत्र न्यासक्रमात् ध्यानक्रमे विशेषः पूजातन्यासक्रमेणैव ततः पूर्वदिशि कुंडं स्थंडिलं वा निर्माय तत्रैव
वक्ष्यमाणक्रमेण वह्निमुपसमाधाय मंडलाद्ब्रह्मादिदेवतास्तत्रावाह्य तिलयवतंडुलाद्यैः ब्रह्मणे अष्टोत्तरशतमन्येभ्योऽष्ट॰
शादशाहुतीर्हुत्वा पूर्णाहुतिं विधाय मंडलाद्ब्रह्मादिदेवतास्तत्रावास्य पुनर्मंडले देवानानीय वक्ष्यमाणद्रव्यैर्मंत्रैश्च बलिं दद्यात्
यथा पायसोदनलाजैश्च युक्तं धूपप्रसूनकैः फलादिभिः शर्करायूष स्वसंयुक्तं माषभक्तादिमंडितं गृहाणेमं बलिं ब्रह्मन् वा
स्तु दोषं प्रणाशय इति पठित्वा जलेनोत्सृजेद्देवं सर्वत्र गंधादिशर्करायुपपायसोपरिसंयुतं आर्यका च गृहाणेमं सर्वं
दोषप्रणाशय चंदनाद्यर्चितं नाथ फलैः शर्करगुडमंडितं विवस्वन् वै गृहाणेमं सर्वदोषं प्रणाशय २ सगुडपायसेनाथ पुष्पा
दिसमन्वितं गृहाणेमं बलिं हृष्टो मित्र शांतिं प्रयच्छ मे माषौदनसमांसं च गंधादिक्षीरसंयुतं गृहाणेमं महीभृत् सर्वदोषं
प्रणाशय ततश्चैशानादिक्रमेण बलिं दद्यात् पूजात आग्नेयादिक्रमेण पूर्वोक्तानेयाः क्षीरखंडसमायुक्तं पुष्पादिभिरलंकृतं
गृहाणेमं बलिं हृष्टमाप शांतिं प्रयच्छ मे दधीदगुडसंमिश्रं गंधादिभिः संयुतं गृहाणेमं बलिं वत्स विघ्नमत्र प्रणाशय पुष्पा
दिकुशपानीयं शर्करागुरुवासितं सावित्र वै गृहाणेमं शांतिमत्र प्रयच्छ मे पिष्टकं सगुडं नाथ रक्तगंधादिशोभितं गृहाणेमं २०

वलिमर्यं विघ्नमत्रप्रणाशय प्रीतमन्नं तथा पुष्पं कुंकुमादि समन्विते गृहाणेमं वलिं हृद्यं शाकदेव नमोऽस्तु ते ओदने घृतसंयु
क्तं वस्त्रगंधादि मंडिते गृहाणेमं वलिं हृद्यं मिंडजय नमोऽस्तु ते । पक्वापक्वमिदं मांसं वस्त्रपुष्पादिसंयुते गृहाणेमं वलिं हृद्यं रुद्र
देव नमोऽस्तु ते समांसं घृतसंयुक्तं गंधपुष्पादिसंयुते गृहाणेमं वलिं हृद्यं जयस्वस्ति नमोऽस्तु ते रक्तपुष्पसमांसं वै रक्तवस्त्रादिसंयुते
विदारिवै गृहाणेमं रक्तो विघ्नं विनाशय पीतरक्तास्थिसंयुक्तं रक्तगंधादिमंडिते गृहाणेमं तैरक्तो विनाशय सघृतं माषभक्तं
च रक्तगंधादिसंयुते वलिं गृहाण शर्वेतं रक्तो विघ्नं विनाशय सघृतं माषभक्तं च रक्तगंधादिसंयुते वलिं गृहाण शर्वेतं र, मांसपु·
ष्पादिसंयुक्तं माषभक्तोयसंयुते गृहाणेमं वलिं स्कंद रक्तो विघ्नं विनाशय समांसं पिष्टकं युक्तं पक्वमांसोदकान्विते अर्यमन्
वै गृहाणेमं सर्वविघ्नं विनाशय रक्तमांसोदनं मत्स्यगंधपुष्पसमन्विते जंभक त्वं गृहाणेमं रक्तो विघ्नं प्रणाशय छागकं मांसान्वि
तं मांसं वस्त्रगंधादिसंयुते पिलिपिच्छि गृहाणेमं रक्तो विघ्नं विनाशय घृतेन माषितं मांसं वस्त्रगंधादिसंयुते कि त्वं गृहाणेमं रक्तो
विघ्नं विनाशय सघृतं वा दतं तत्र वस्त्रगंधाद्यलंकृते गृहाणेमं वलिं नीशावास्तदोषाय हारकं उत्पलेपायसैर्युक्तं वस्त्रादिकसमन्वि
ते गृहाणेमं वलिं हृद्यं मेघराज नमोऽस्तु ते पंचवर्णं हं स पीतं वधनं भक्तादिमंडिते गृहाणेमं वलिं हृद्यं जिस्नुसत नमोऽस्तु ते ओद
ने घृतसंयुक्तं पंचरत्नादिमंडिते गृहाणेमं वलिं हृद्यं देवराज नमोऽस्तु ते रक्तपुष्पयुतं भक्तं रक्तगंधादिभिर्युतं गृहाणेमं वलिं हृ
द्यं भास्कराय नमोऽस्तु ते वितानं धूमवर्णाभं गंधादिकसुशोभितं रक्तपुष्पं गृहाणेमं वलिं सत्य नमोऽस्तु ते इदं तं मांसभक्तं वै वस्त्रगं

भैर॰
त्वा॰
२१

धूपादिपूजिते गृहाणेमं हुष बलिं वास्तुदोषविनाशाय इदं तु शाल्मलेमांसैर्नैवेद्यादिसमन्विते गृहाणेमं बलिं हृष्टो व्योम शान्तिप्रय
च्छमे सुवर्णपिष्टकं चाय्यवस्त्रगंधादिभिर्युतं घृतान्विते गृहाणेमं सम्भजिह्व नमोऽस्तु ते दीरलाजसमायुक्तं गंधपुष्पादिसंयुते
गृहाणेमं बलिं हृष्ट्वा पूषदेव नमोऽस्तु ते मांसोदने गंधमाल्ययुते वस्त्रादिभूषिते वितथेमं बलिं गृहाण वास्तुदोषविनाशाय मत्स्य
मांसयुतं भक्तं गंधपुष्पाद्यलंकृते यमराज गृहाणेमं बलिं शान्तिं प्रयच्छ मे पक्वमांसौदनं नवनीते वस्त्रादिमण्डिते प्रीतिकर गृहा
णेमं गृहरक्ष नमोऽस्तु ते नानागंधसमायुक्तं रक्तपुष्पादिभिर्युतं बलिं गृहाणेमं गंधर्व सर्वदोषप्रणाशाय इमां तु शाकुनीं जिह्वां माष
भक्तोपरि स्थितां गृहाणेमं भृंगराज बलिं शान्तिं प्रयच्छ मे यवं तिलघृतोपेतं गंधपुष्पादिभिर्युतं गृहाणेमं बलिं हृष्ट्वा मृगदेव न
मोऽस्तु ते शर्करामण्डितं खण्डवस्त्रगंधाद्यलंकृते प्रीतो बलिं गृहाणेमं रक्षोराज नमोऽस्तु ते वेदनागुडकाखण्डवस्त्रगंधादिभिर्यु
ते गृहाणेमं बलिं हृष्ट्वा दौवारिक नमोऽस्तु ते इदं तु पायसेनाढ्यं गंधपुष्पादिमिश्रितं सुग्रीव देव गृहाणेमं बलिं शान्तिं प्रयच्छ मे
यवान्नं लड्डुकं स्थं भक्तोपरि समर्पितं गृहाणेमं बलिं हृष्ट्वा जलदेव नमोऽस्तु ते माषभक्तं कृशरान्नं वघृतं गंधादिसंयुतं पुष्पदन्त
गृहाणेमं वास्तुदोषप्रणाशाय मधुना साधितं पिष्टं गंधाद्यैरुपशोभितं बलिं गृहाणासुरेन्द्र सर्वदोषप्रणाशाय घृतं वान्नसं
माषभक्तं कृसरादिसमन्वितं गृहाणेमं बलिं शोष सर्वशान्तिं प्रयच्छ मे जवं तण्डुलेनाढ्यं गंधपुष्पादिशोभितं गृहाणेमं बलिं
रोग सर्वदोषप्रणाशाय सघृतं मण्डकं चैव दमनाद्यैरुपशोभितं गृहाणेमं बलिं हृष्ट्वा गंधवाहन नमोऽस्तु ते इदं तु कृशरान्नं मेऽडपगा

21

षादिसाधिते पातालेश गृहाण मे विघ्नमन्त्रप्रणाशाय नालिकेरोदकं भक्ष्यं पीतवस्त्रादिसंयुतं गृहाण मे बलिं सर्वं ग्रहवास्तु
दोषप्रणाशाय दधिगोक्षीरादिभिर्युक्तं पीतपुष्पसमन्वितं बलिं प्रगृह्णातां सोम सर्वदोषप्रणाशाय ओदनं घृतसंमिश्रं गंधपुष्पस
मन्वितं गृहाण मे बलिं हृष्टो भल्लाटक नमोऽस्तु ते माषान्नं घृतान्भक्ष्यं गंधपुष्पादिमंडितं गृहाण मे बलिं हृष्टो मर्गलायन मो
ऽस्तु ते क्षीरखंडसमायुक्तं नानापक्वोपशोभितं दैत्यमातर् गृहाण मे सर्वदोषप्रणाशाय पोलिकां मधुसंमिश्रां वस्त्रगंधादिसं
युतां गृहाण मे बलिं हृष्टे देवमातर्नमोऽस्तु ते स्वर्गपातालमर्त्येषु ये देवा वास्तुदेवताः गृहीत्वा तु मे बलिं हृष्टा येन त्राता यांतु सर्वदा
रे मातरो भूतवेतालाः ये चान्ये बलिकांक्षिणः विघ्नोपरिवारा ये च ते पि गृह्णन्तु मे बलिं ॐ पितृभ्यो नमः ओं क्षेत्रपालेभ्यो
नमः उक्तप्रकाराभावे कुंकुमपुष्पादिभिः पूजा कर्तव्या अथ प्रदिशो बलिदाने तत्र दधिजलहरिद्रापुष्पलाजसक्तुतिलभ
क्तैः र्ष्टी बलीन्निःक्षेपाय पूर्वादि प्रादक्षिण्येन दद्यात् यथा ॐ इंद्राय सुराणामधिपाय सवाहनाय सपरिवाराय सशक्तिकाय एत
त्पार्षदेभ्यः सर्वेभ्यो भूतेभ्यश्चायमेष बलिर्नमः इति पूर्वस्यां ॐ अग्नये तेजसामधिपाय सवाहनाय सपरिवाराय सशक्तिकाय एतत्पार्ष
देभ्यः सर्वेभ्यो भूतेभ्यश्चायमेष बलिर्नमः इत्याग्नेय्यां ॐ यमाय प्रेतानामधिपाय सवाहनायेत्यादि इति दक्षिणस्यां ॐ निरृ
तये रक्षसामधिपाय सवाहनायेत्यादि पूर्ववत् इति नैरृत्यां ॐ वरुणाय जलानामधिपाय सवाहनायेत्यादि इति पश्चिमा
यां ॐ वायवे प्राणानामधिपाय सवाहनायेत्यादि इति वायव्यां ॐ सोमाय नक्षत्राणामधिपाय सवाहनायेत्यादि इत्युत्तर

मे॰र
त्ना॰
२२

22

सो ॐ ईशानायविद्यानामधिपायसवाहनायसपरिवारायसशक्तिकायेतत्सार्धदेभ्यः सर्वेभ्योभूतेभ्यश्चायमेषबलिर्नमः इत्यैशान्यांबा-
लिंदद्यात् ततोमंडलेषुनवग्रहादीन्संपूज्य यान्तुदेवगणाःसर्वेपूजामादायपार्थिवीं इष्टकामप्रसिद्ध्यर्थंपुनरागमनायच
इतिमंत्रेणदेवान्विसर्जयेदाचार्यः ततोयजमानः ॐअद्येत्यादिकारितवास्तुयागप्रतिष्ठार्थमिदंहिरण्यमग्निदैवतममुकगो-
त्रायामुकशर्मणेब्राह्मणायाचार्याय दक्षिणांतुभ्यमहंसंप्रददे सोपिॐस्वस्तीतिब्रूयात् ततोयजमानस्तंप्रणमेत् केचि-
त्तुमंडलपूजोत्तरे मंडलादीशानकोणेकलशंसंस्थाप्यहोमबलिपूजान्तकर्मकृत्वाकलशस्थपल्लवैस्तज्जलेन सुरास्त्वामभि-
त्वादिभिर्वक्ष्यमाणमंत्रैः सांबुवैशिष्यंसपुत्रंसकलत्रमाचार्यो ऽभिषिंचेत् ततःशिष्योदक्षिणांदद्यादेवमाचरेति कलशस्थापन-
विधिरग्रेवक्ष्यते वैदिकविधिनावाकलशस्थापने अथवास्तुयागोगृहारंभेगृहप्रवेशप्रसङ्गेसिंहस्थसूर्येयावैकमेवः
फलेत् एवंविदधतोगेहेनाकल्याणंकदाचन अकालमरणंव्याधिभूतप्रेतादिकोपिच नसर्पपीडनानान्योन्यकलहान्य-
शुभानिच पुत्रपौत्रधनारोग्यपशुदासीसमृद्धिभाक् अरोगीविजयीख्यातश्चिरंजीवतितद्गृहे राजवेश्मसुसर्वेषुतथामहि-
षीगृहे सचिवामात्यसेनानीभवनेषुपुरेतथा विदध्याद्वास्तुवर्षेतत्प्रोक्तसिद्ध्यैतदैविकाः नचेत्कामप्याप्नुयात्फलैःक्लेशभा-
गिसेभवेत् इतिवास्तुयागः ततोनक्षत्रवारराशीनामनुकूलेशुभेदिने भूमिशुद्धिंविधायपुण्याहंवाचयेत् तद्यथा त-
त्रयथासामग्रीब्राह्मणवरणंकृत्वा अस्यकर्मणःपुण्याहंभवन्तोब्रुवन्तु इतिकर्ताविवदेत् ॐपुण्याहंकर्मणोस्त्विति ब्रा- २२

स्थाणवदेशुः एवंस्थण्डिलेवाचयेत् ऋद्धिंच ॐकारेब्राह्मणेञ्ज्यात्रिरोकारेमहीपतौ उपांशुचतथावैश्येपस्थण्डिलेशूद्रेप्रयोजयेत्
इतिगुणपाहवावनम् ततषोडशावर्तंशहादशाहस्तंवामंडपंविरच्य तत्राष्टदिक्षु चतुरस्र योनि अर्द्धचंद्र त्रिकोण वृत्त
षट्कोण पद्म अष्टकोण कुंडानिरचयेत् ऐंद्रेशानयोर्मध्येचतुरस्रंवृत्तं आचार्यकुंडंरचयेत् इतिनवकुंडपक्षःश्रेष्ठः तदश
क्तौ चतुरस्राऽर्द्धचंद्रवृत्तपद्मकुंडानि चतुर्दिक्षु एवमेवचतुरस्रंवृत्तंवा पंचमंकुर्यात् इतिपंचकुंडीपक्षोमध्यमः तदशक्तौचतु
रस्रमेकंकुंडंमत्तुरस्रंवाविदध्यादित्येककुंडीपक्षः कनिष्ठः अत्राप्यशक्तःस्थंडिलंकुर्यात् तथा[illegible] नित्यनैमित्ति
केहोमंस्थंडिलेवासमाचरेत् ग्रंथांतरेसपक्षमेयुक्तंचतुरस्रंसममेततः हस्तमात्रमितिविशेषः [illegible] त्रिरस्रंचतुरस्रंवावि
तस्त्युच्छ्रायंयमितं सिकताभिर्विधातव्यंस्थंडिलंहस्तमात्रकं द्व्यंगुलोच्छ्रितोयत्रः प्रथमः परिकीर्तितः त्र्यंगुलोच्छ्राय
स्तुगुरुकोवप्रस्तूमिमध्यापरि द्व्यंगुलस्तत्रविस्तारस्सर्वेषांकथितोबुधैः होमाधिकेतत्रैव सार्द्धद्विगुणितोवापिकर्तव्यस्थंडिल
स्तथा रक्तचंदनचूर्णवाग्रेकौपलाशपत्राभ्यां अश्वत्थपत्राभ्यांहोमःकर्तव्यः तथाचोक्तं रक्तचंदनचूर्णवाऽभावे तदलाभेपलाशस्य
सर्वाभ्योह यतेहविः वशिष्ठसंहितायां पलाशपत्रेनिःछिद्रैहविरेकरकवामनौ विदध्यादश्वत्थपत्रेसंहितेमेहोमकर्मणि
अथांकुरार्पणं तत्रनक्षत्रदिनेशरः नादौमत्स्यसहितिवावनेवहकमादौशादिवसातप्राक सप्तमेनवमेवादिने अंकुरार्पणंकु
र्यात् यथाप्रकाशितनशुद्धेसमेस्थले मंडपवेदिकायाः उत्तरतः परितोवेष्टितदीर्घचतुरस्रशालांकृत्वा तन्मध्येचतुरस्रं

मे॰र
ता॰
२२

23

स्थंडिले विधाय तत्र सर्वापरायतानि हस्तप्रमाणानि द्वादशांगुलांतरालानि पंच सूत्राणि पातयेत् दक्षिणोत्तरायतानि तद्व
देव एकादश सूत्राणि पातयेत् एवं चत्वारिंशत्कोष्ठानि भवंति तत्र पंक्त्याकारेण दिक्चतुष्टयमध्यसूत्राणि विलोपयेत् तेन
चतुष्कोष्ठो वीथी भवति उभयपार्श्वयोर्द्वे वीथ्यौ कर्त्तव्ये एवं षोडश कोष्ठानि भवंति तानि कोष्ठानि पदानि रंजयेत् तानि श्वेतपी
तारुणानि तैः रजोभिः श्यामलेनाथ वीथीरापूरयेत्तथा सीमारेखाः सपिरजः पूरणं कुर्यात् तत्र षोडशांगुलोन्नताः गभी
राः शरावाकृतयः पालिकाः द्वादशांगुलोन्नताः कोष्ठपंचकयुक्ताः पंचशरावाः पंचमाख्यः अष्टांगुलोन्नताः अल्पगंभीराः
पालिकाः एव शरावाः ताः प्रत्येकं चतुष्पंचकोष्ठेषु व्रीहिपरिप्रागग्रास्तीर्णदर्भगंधपुष्पाक्षतैः कुर्वीत परिजलक्षालिते हृत्रवे
ष्टिते आग्नेयादीशानांतं पंक्तिरूपेण स्थापयेत् पात्राणि मृद्वालुकाकरीषपूरयित्वा स्वस्तिवाचनपूर्वकं तूर्यादिघोषसहितम्
शालिप्रियंगुमुद्गमाष कुलत्थाढकीनिष्पाव श्यामाक तिल सिद्धार्थाः यवबीजदशकं क्षीरेण वमिति क्षालयित्वा
मूलेनाभिमंत्र्य तेषु पात्रेषु वापयित्वा हरिद्रोदकसिक्तवस्त्रेणाच्छादयेत् ततः प्रतिरात्रि तत्तद्रात्रिदेवताभ्यस्तत्तद्द्रव्यैर्ब
लिं दद्यात् तत्र भूतपितृनागयक्षब्रह्मशिवविष्णुसंज्ञाः सप्तरात्रिदेवताः लाज तिल हरिद्रा राजी दधि स क्तुभिर्भूतबलिम्
हरिद्रं दद्यात् तिलतंडुलैः पितृबलिं सोडुंबरकयावन्नलाजैर्यक्षबलिं नालिकेरोदकसक्तुपिष्टैर्नागबलिं पक्वान्नैर्ब्र
ह्मबलिं घृतापूपैः शिवबलिं सप्तरात्रिसक्रमेण दद्यात् नवरात्रपक्षे तु उक्तयावन्नेन क्रमेणैव तयोर्विष्णवे बलिं द २३

पातःप्रायदिनद्वये प्रणवादिनमोन्तानि स्वसत्तामानि वलिमन्त्राः यथा ॐ भूतेभ्यो नमः ॐ पितृभ्यो नमः इत्यादिना ग्रहादि
भ्यो दद्यात् एवं प्रतिदिने सायंप्रातर्हरिद्रोदकसेचने वलिदाने च कुर्य्यात् एतदङ्कुरार्पणं सर्वोत्सवेषु मङ्गलकरं भवति त
ॐ [illegible] यो दीक्षायामभिषेके पुनर्नवे गृहप्रवेशने यात्रासु त्रिविधास्वाहुरङ्कुरार्पणकर्मणि पालिकाः पञ्च सप्त वा
शरावाण्यथवा नव क्रमात् वत्सवेषु च सेषपूर्वमेव विदध्यादङ्कुरार्पणं ततो दीक्षात् यजमानाभिवृद्ध्यर्थमङ्कुराणि परीक्षयेत्
संप्रकुर्वे प्रवृद्धानि कोमलानि सितानि च भ्रमवस्तां न प्रसन्नानि तथा तिर्यग्गतानि च श्यामलानि वक्राणि वर्जयेद्
शुभानि च अहारिक्रूरते कृत्ले भ्रमाभे कलहं तथा अपुसंजननाशं च उभिन्नेष्वप्यमलोऽङ्कुरे तिर्यग्पाते भवेद्व्याधिः कुञ्जे श
त्रुभयं भवेत् अशुभे चाङ्कुरे जाते शान्तिहोमं समाचरेत् मूलमन्त्रेण जुहुयाद्दूरसमृद्धिं पञ्चसहः अष्टोत्तरसहस्रेण वा सहस्रेण श
तेनाप्यसहस्रके इत्यङ्कुरार्पणं अथाधिवासनं तत्र दीक्षादिवसात् पूर्वदिने शिष्यः प्रातः स्नातः कृतनित्यक्रियः समलं
कृतः पञ्चवाद्यघोषपुरःसरं प्राङ्मुख उदङ्मुखो वा ॐ अद्य अमुके मासि अमुकराशिगते सूर्ये अमुकपक्षे अमुकतिथौ
अमुकगोत्रः ब्राह्मणोऽहं अमुकशर्मा क्षत्रियश्चेदमुकवर्मा वै गुप्तः शू दासोऽहं चतुर्विधपुरुषार्थसिद्धिकामः अः क
तेन मन्त्रमनकामकदेवताम् अत्र दीक्षार्थमभ्युताधिवासनमहं करिष्ये इति कृत्वा तिलाञ्जलिं मेकलः उत्तरीयवस्त्रदपटवस्त्राभर
णकनकयज्ञोपवीतहारकेयूराङ्गदनानाभरणावामरोपानद्धुगपट्टकास्तरणपाद्यधावमनीयमधुपर्कादियात्रवि


मं॰र
त्रा॰
२४

शेषसंपन्नां वरणसामग्रीं गुरुसन्निधौ निधाय अद्येहेत्यादि प्राग्वदुल्लिख्य चतुर्विधपुरुषार्थसिद्धिकामो अमुकदेवतामंत्रग्रह
णार्थं अमुकगोत्रममुकशर्माणं भवंतमेभिर्यथाशक्ति विहितवरणसाधनैर्गुरुत्वेन त्वामहं वृणे इति गुरुपादौ शरणं वरण
सामग्रीं निवेदयेत् ततो ओं वृतोस्मीति गुरुणा प्रतिवचने दत्ते शिष्यः कृतांजलिः यथाविधि कर्म कुरुष्वेति ब्रूयात् ततो गुरुः
करवाणीति ब्रूयात् एवं कृतनित्यकृत्यो हि तौ गुरुयोगार्थं मंडपं गत्वा आचम्य समाचम्यार्घं विधाय फडिति सामान्यार्घजलेन
द्वारमभ्युक्ष्य द्वारदेवताः पूजयेत् यथा ऊर्ध्वोदुंबरे ओं विघ्नाय नमः ओं महालक्ष्म्यै नमः दक्षिणशाखायां ओं विघ्नेशाय नमः
25 वामशाखायां ओं क्षेत्रेशाय नमः तयोः पार्श्वयोः ओं गंगायै ओं यमुनायै देहल्यां पुष्पवारिणा ओं अस्त्राय नमः इति पूज
येत् ततो दक्षिणपादपुरस्सरं वामशाखां स्पृशन् दक्षिणांगं संकोचयन् मंडपांतः प्रविश्य नैरृत्ये ओं वास्तुपुरुषाय नमः :
ओं ब्रह्मणे नमः इति संपूज्य मूलमुच्चरन् दिव्यदृष्ट्यावलोकयन् दिव्यान्विघ्नान्समुत्सार्य अस्त्राय फडिति जलेनांतरिक्षगान्
विघ्नानुत्सार्य वामपार्ष्णिघातत्रयेण भौमान्विघ्नानुत्सार्य पुष्पक्षेपेणाकाशगान् याम्यां मंडपं प्रोक्ष्य बहिर्द्वारवर्ज्यं तच्छुद्धिं कुर्यात्
शाय यथा मूलमुच्चरन् वीक्षणप्रोक्षमंत्रेण उन्नातहस्तेन जलेन प्रोक्ष्य तेनैव कुशैः मंत्राढ्यं हुमिति जलेन शोधयेत् अस्त्रहिता
अभ्युक्ष्य मूलमुच्चरन् वेदिकाग्रहकशरैर्मंडपांतरे भूपयित्वा फडिति सर्वासु दिक्षु अन्यान् विकिरान्विकिरेत् लाजवेदनसि
द्धार्थभस्मदूर्वाकुशाक्षताः विकिरा इति मंदिरास्सर्वविघ्नापनाशकाः फडिति दर्भमुष्टिना मंडपांतरे संमार्ज्य ईशकोणे २४

तान्दर्भान् वर्द्धन्यास्त्रामनार्थेन्यसेत् वर्द्धनीं भ्रामयन्त्या इति प्रसिद्धा ततः पूर्वोक्तप्रकारेण गुरुणा हैवावपिता अर्घ्यदपिके
विधाय दक्षिणादिभिर्ब्राह्मणान् तोषयित्वा भूतानेसमपविश्य भूतशुद्धिमातृकान्यासविशेषन्यासांतर्यजनार्घ्यस्थापना
दिविधाय सर्वतोभद्रमंडलकमलोपरि आधारशक्त्यादि पीठमंत्रपर्यंतेसम्यक्कलशस्थापनेकुर्यात् आसनोपवेशनादि
विधिर्वक्ष्यमाणनिमित्तोपस्कृतेरवसेयः सर्वतोभद्रमंडलेयथा वर्तरहवतः कोष्ठकाणिसूत्रसमन्विते चतुर्थपि वेकुंठेष्ठको
णसूत्रचतुष्टये मध्येमध्येतथामत्स्याभवेत्ततः पातयेत्तथा पूर्वापरायते द्वेद्वे मध्ये यामोत्तरायते पातयेत्तेषु मत्स्येषु समम्
त्रचतुष्टये पूर्ववत्कोणसूत्रेषु कर्मसूत्राणि पातयेत् तदङ्कितेषु मत्स्येषु दत्वात्सूत्रचतुष्टये ततः कोष्ठमत्स्यास्तेषु सू
त्राणि पातयेत् एवं कृते हृदये मे त्रीषट्‌वा शतसदान्यापि तावन्तेनैव विधिना तत्र सूत्राणि पातयेत् षट्त्रिंशतापदे मध्ये
लिखेत्पद्मं सलक्षणं वहिः पंक्त्या भवेत्पीठं पंक्तिद्वयेन वीथिका द्वारशोभोपशोभास्तान् शिष्टाभ्यां परिकल्पयेत् शाखो
क्तविधिना मंत्री ततः पद्मं समालिखेत् पद्यदेत्रस्यसूत्रमद्वादशांशे वहिः सुधी तन्मध्ये विभजेद्वृत्तैस्त्रिभिस्समविभा
गतः आद्ये स्यात्कर्णिकास्थाने केसराणां द्वितीयके तृतीये तत्र पत्राणां मत्कोशेन दलाग्रके व्याससूत्रोत्तरालस्समानेय
द्विधिना सुधीः निधाय केसराग्रेषु परितोष्टौ निशाकरान् लिखित्वा सेषिसेस्यानि तत्र सूत्राणि पातयेत् दलाग्राणां वयमा
नेनत्मानेहमसमालिखेत् तदेतरालनन्मध्यसूत्रस्योभयतः सुधीः आलिखेद्वास्यहस्तेन दलाग्राणि समेततः पुरमशाद

मे॰ र लग्नेलेषु केसराणि प्रकल्पयेत् एतन्माधारसोशाङ्केषु कजेतेत्र वेदिभिः पदानि वीथीणि पादार्थे पीठकोणेषु मार्जयेत् अव-
ला॰ शिष्टैः पदैर्विदान पीठगात्राणि कल्पयेत् पदानि वीथिमेस्थानि मार्जयेत्सेत्र समेदतः दिक्षुद्वाराणि रचयेद्विवतक्षो-
२५ ष्टकैस्ततः पदैस्त्रिभिरथैकेन शोभास्तद्वैश्र्णार्श्वतः उपशोभास्तुरेकेन त्रिभिः कोष्ठैरनंतरं अवशिष्टैः पदैः षड्भिः को-
णानास्याच्चतुष्टयं रंजयेत्सेवमभिर्वर्णैर्मंडलेतन्मनोहरे पीते हरिद्राचूर्णं स्यासिते तंडलसंभवः कुसुंभचूर्णं महणे कृष्णे
दग्धपुलाकजं बिल्वादिपत्रजं श्याममित्रकं पत्रपंचकं श्रेष्ठलोत्सेधविस्ताराः सीमारेखाः सिताः शुभाः कर्णिका
25 पीतवर्णेन केसराणि पहणेनव शुक्लवर्णेन पत्राणि तत्सेधीन्धश्यामलेनव रजसा रंजयेन्मंत्री यद्वा पीतेव कर्णिका
केसराः पीतरक्तास्तुरहणानि दलान्यपि सेषयः कृष्णवर्णाः स्युः पीतेनाप्यसितेनवा रंजयेत्पीठगर्भाणि पादास्तुर
हणप्रभाः गात्राणि तस्य शुक्लानि वीथीषु वतस्तुथपि शालिवित्कल्पलतिकादलपुष्पसमन्विताः वर्णैर्नानाविधैश्-
चित्राः सर्वदृष्टिमनोहराः द्वाराणि श्वेतवर्णानि शोभारक्ताः समीरिताः उपशोभाः पीतवर्णाः कोणान्यसितभास्मिच
ति स्वोरेखावहिः कुर्यात् सितरक्ताः सिताः क्रमात् मंडले सर्वतोभद्रमेतन्माधारणं स्मृते ततोसर्वतोभद्रमंडलाय नमः
इति मंडले संपूज्य कर्णिकोशणशालिधान्यैराढ्यं तदुपरि तंडुलान् तदुपरि दर्भानास्तीर्य तदुपरि वेदनाद्ध तपुतेकृत्वे
न्यसेत् पंचभिर्नवभिर्वा पंचविंशत्या वाकशैर्जटिकाकवैः ततस्तत्र य ब्रह्मादिविषेनमः रेठष्मा लेखलिनीबंजालिनी २५

शेविस्फुलिंगिनी षेसुश्री सेसुरूपा हेकपिला लेहव्यवाहा ळेकव्यवाहा एताः प्रत्येकेविन्यस्य क्रमेणाभ्यर्चयेत् ततः
प्राधारशक्त्यादिपीठमंत्रांतेसंपूज्य स्ववर्णरजततामसूतिकामनरचरितेकुंभे प्रसन्नमजलेनक्षालितांतरेवेदनागुरुक
र्पूरधूपितांतरे नीरंध्रेत्रिगुणसूत्रवेष्टितांतरे पुष्पादिभिरलंकृते दूर्वाक्षतान्वितेनवरत्नोदरे
ॐकारमुच्चरन्तत्रस्थापयेत् तत्कुंभपीठयोरैक्यंविचिंत्यतीरिदुमकषायेण पलाशवल्क
येणवा गोडम्बेनपंचगव्येनवासुवासितेनस्नापयेदकेवाविपरीतमातृकांतेत्रिवारमेकवारं
वाविपरीतमूलमंत्रंजपन् कुंभंपूरयेत् ततः फडितिशोधयेत्कलशं नमइति हस्लेंहींबीजे
नत्रविलिख्य मूलमंत्रेणकाथतोयेनार्घ्यं नमइत्यनुगंधयेदपात् अष्टगंधेयथा वेदना
गुरुकर्पूरवारकुंकुमरोचना जटामांसीकपिपुताशक्तेर्गंधाष्टकेविदुः वेदनागुरुह्रीवेर
कुष्ठकुंकुमसेवकाः जटामांसीमुरमितिविष्णोर्गंधाष्टकेस्मृ वेदनागुरुकर्पूरतमाल
जलकुंकुमे कुशीतकुष्ठसेउक्तेशैवेगंधाष्टकेस्मृते शम्भुमार्यः वेदन अगरु कर्पूर कुष्ठ
कुंकुम रोचना जटामांसी गोटीमत इशाक्तेर्गं वेदन अगरु कर्पूर तमाल वाला
कुंकुम रक्तचंदनकुष्ठ इतिशैवे गंधाष्टके ततःशङ्खजलेसोमकलाःषोडशावाह्याः यथाअमृतेइहागकेसावास



मे. त्रौ. २९

26

गंधादिभिरभ्यर्च्य प्राणप्रतिष्ठां कुर्यात् एवं अं अमृता आं मानदा इं पूषा ईं तुष्टिः उं पुष्टिः ऊं रतिः ऋं धृतिः ॠं शशिनी
ऌं चंद्रिका ॡं कांतिः एं ज्योत्स्ना ऐं श्रीः ओं प्रीतिः औं अंगदा अं पूर्णा अः पूर्णामृता एतासां सोमकलानां प्रत्येकमा
वाहनादि प्रतिष्ठांतं कुर्यात् अथवा एकदैव अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः अमृतामानदापूषातुष्टिपुष्टि
रतिधृति शशिनी चंद्रिकाकांतिज्योत्स्नाश्रीप्रीत्यंगदापूर्णापूर्णामृता इहागच्छंत्वित्यादिनावाहनादिकं कृत्वा ओं
अमृतादिभ्यो नम इति संपूज्य ओं अमृतादीनां प्राणा इह प्राणा इत्यादि प्रकारेण प्राणप्रतिष्ठां कुर्यात् यद्वा स्वरसंभवा
अमृतादि सोमकला इहागच्छंतु इह तिष्ठंतु इत्यावाह्य गंधादिभिरभ्यर्च्य प्राणप्रतिष्ठां कुर्यात् केचित्तु अमृतादिषोड
शकला इहागच्छंत्वित्यावाह्य ओं अमृतायै नमः इत्यादि प्रत्येकं संपूज्य अमृतादिकलानां प्राणा इत्यादिक्रमेणैकदा
प्राणप्रतिष्ठां कुर्वंति एवं सूर्यकला द्वादशावाह्या तास्तु कं भं तपिनी खं बं तापिनी गं फं धूम्रा घं पं मरीचिः ङं
नं ज्वालिनी चं धं रुचिः छं दं सुषुम्णा जं थं भोगदा झं तं विश्वा ञं णं बोधिनी टं ढं धारिणी ठं डं क्षमा एतासामप्
येकमेकदा वा पूर्ववत् आवाहनादि प्राणप्रतिष्ठांतं कुर्यात् एवं दश वह्निकला आवाह्या तास्तु यं धूम्रार्चिः रं ऊष्मा
लं ज्वलिनी वं ज्वालिनी शं विस्फुलिंगिनी षं सुश्रीः सं सुरूपा हं कपिला लं हव्यवहा क्षं कव्यवहा एतासामपि प्र
त्येकमेकदा वा आवाह्य संपूज्य प्राणप्रतिष्ठां कुर्यात् ततः पूर्ववत् प्रत्येकमेकदा वा अकारभवसृष्ट्यादि दशकलाः २९

समावाह्याः ॐ हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा
ऋतेबृहत् इतिमन्त्रेणप्राणप्रतिष्ठां कुर्यात् ताश्च कंसृष्टि खंऋद्धि गंस्मृति घंमेधा ङंकान्ति चंलक्ष्मी छंद्युति
जंस्थिरा झंस्थिति ञंसिद्धयः ततः उकारभवजरादिदशकलाः समावाह्य ॐ प्रतद्विष्णुस्तवते वीर्येण मृगो न भीम
कुचरो गिरिष्ठाः यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा इतिमन्त्रेणप्राणप्रतिष्ठां कुर्यात् ताश्च
टंजरा ठंपालिनी डंशान्ति ढंईश्वरी णंरति तंकामिका थंवरदा दंह्लादिनी धंप्रीति नंदीर्घाः ततः श्रुवपन्प्रते
कमेकदावामकारभवतीक्ष्णादिदशकलाः समावाह्य ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनं उर्वारुकमिव ब
न्धनान्मृत्योर्मुक्षीय मामृतात् इतिमन्त्रेण तासां प्राणप्रतिष्ठां कुर्यात् ताश्च पंतीक्ष्णा फंरौद्री बंभया भं
निद्रा मंतन्द्री यंक्षुधा रंक्रोधिनी लंक्रिया वंउत्कारी शंमृत्यवः ततस्तथैव बिन्दुभवपीतादिपञ्चकलाः समावा
ह्य ॐ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः दिवीव चक्षुराततं तद्विप्रासो विपन्यवो जागृवांसः समिन्धते विष्णो
र्यत्परमं पदं इतिमन्त्रेण तासां प्राणप्रतिष्ठां कुर्यात् ताश्च षंपीता संश्वेता हंअरुणा लंअसिता क्षंअनन्ता
ततः पूर्ववत् नादभवनिवृत्त्यादिकलाः समावाह्य ॐ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु आसिञ्चतु प्रजापतिर्धाता
गर्भं दधातु ते गर्भं देहि सिनीवालि गर्भं देहि सरस्वति गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ इतिमन्त्रेणप्राणप्र

मं॰र
त्ना॰
२७

णप्रतिष्ठां कुर्यात् तास्त्र अं निवृत्ति आं प्रतिष्ठा इं विद्या ईं शान्ति उं इन्धिका ऊं दीपिका ऋं रेचिका ॠं मोचिका ऌं परा ॡं सूक्ष्मा
एं सूक्ष्मामृता ऐं ज्ञानामृता ओं आप्यायिनी औं व्यापिनी अं व्योमरूपा अः अनन्ता ततः प्रतिलोममूलमन्त्रं जपेदिति संप्रदायः
प्राणप्रतिष्ठां कुर्यात् सर्वासां कलानामावाहनेऽप्ययं जीवकृतावाश्रेते विलोममूलमन्त्रं जप्त्वा प्राणप्रतिष्ठां कुर्यादिति प्राणप्रतिष्ठामं
त्रस्तु आं ह्रीं क्रों यं रं लं वं शं षं सं हों हंसः अमुष्य प्राणा इह प्राणाः आं ह्रीं क्रों यं रं लं वं शं षं सं हों हंसः अमुष्य जीव इह स्थि
तः आं ह्रीं क्रों यं रं लं वं शं षं सं हों हंसः अमुष्य सर्वेन्द्रियाणि आं ह्रीं क्रों यं रं लं वं शं षं सं हों हंसः अमुष्य वाङ्मनोनय
नश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा ततस्तत्र वर्तिदेवतात्मकं शंखं काष्ठजलं कुंभे निःक्षिप्य चूतपनसा
श्वत्थकोमलपल्लवैर्विटपवल्लीलतावृन्दैः सरङ्गमवुध्याकुंभवक्त्रं पिधाय सफलाक्षतेश्रावे सरङ्गमफलवुध्याकुंभवक्त्रे
स्थापयेत् ततो निर्मलक्षौमयुग्मेन कुंभं वेष्टयेत् ततो मूलेन तत्र मूर्तिं परिकल्प्य अमुककर्मणे नमः इति संपूज्य वरुणवा
णपूजापद्धतिप्रोक्तक्रमेणावाहनादिषोडशोपचारैर्देवीं पूजयेत् तत ईशानकोणे श्वर्वान् तदर्भेषु तोयपूरितां सनालां वर्द्धनीं सं
स्थाप्य तस्यां सिंहस्थां खड्गखेटकधारिणीं घोररूपां पाशविमास्तां अस्त्राय फडिति अस्त्रमन्त्रेण ऽस्त्रदेवतां संपूज्य अमुकदेवता
नया इदममुकदेवयजनं रक्ष एवमस्मादिभ्यः श्रावयन् वर्द्धनीनालमुखेन वारिणा मण्डपं ततः परिभ्रमन् रक्षां विधाय यथा
स्थाने वर्द्धनीं स्थापयेत् ततः पूर्वस्मरणपद्धत्युक्तप्रकारेण वह्निं संस्थाप्य महागणपतिमन्त्रहोमान्तं कर्म कृत्वा वह्नौ वह् २७

पचेत् यथा फडिति तामादिरविति मात्रे प्रक्षाल्य ततमूलेन गोक्षीरं दत्त्वा पंचदशप्रसृतिमितान् प्रोक्षितंडुलान् फडिति
प्रक्षाल्य तत्र पात्रे प्रक्षिप्य पात्रवदनेडुमिति पिधाय मूलेन शाम्भवो गुरुः पचेत् चरौ सिद्धे सति मूलेनाज्याभिघारणं दत्त्वा हुं
फडिति मंत्रितं कुंभोपरि अवतारयेत् तेव हंवियाविभिज्य एकमंशं देवैर्निवेदयेत् एकांशं पंचविंशतिमाहुतीर्जुहुयान्मू
लेन होमस्तु सर्वेशः शेषो मखे याणिनैव कार्यः तथा चोक्तं मैत्र्यते हविरुत्तानहस्तेन वैश्वानरमुखे हुते होतुश्रद्ध
विनाशाय यजमानो विनश्यति तृतीयं शंशेनमः इति मंत्रेण शिष्येण सह ग्रदशानस्पर्शं यथा स्यात्तथा ग्रासाष्टकं भु
जीत मुक्तिकामः पलाशपुटके भुक्तिकामः पिप्पलपुटके ततः श्वाचान्ताय शिष्याय कृतषडंगन्यासाय क्षीरिवृक्ष
संभवे दंतकाष्ठे तालप्रमाणे नमः इति मंत्रितं दद्यात् शिष्यस्तु दंतान् विशोध्य जलेन प्रक्षाल्य निक्षिपेत् तत्पातफ
लेन प्रागुदक्पश्चिमेशाग्रे शिवमसंक्षिवेतरं तद्दोषशांतये शांतेन दद्ध्वा गुरुर्जुहुयात् ततः शिखाबंधाभिरक्षिते शि
ष्ये वेद्यां दर्भास्तरे स्वप्नं प्रार्थयित्वा पूर्वशिरस्कं स्वापयेत् स्वयमपि शयीत स्वप्नप्रकारस्तु सुप्रभेदागमादुक्तौ लिखितो इमाधि
वासने ततः प्रातरुत्थाय गुरुः कृतनित्यक्रियः तिलाज्येन स्वसकल्पविहितद्रव्येण वा अष्टोत्तरसहस्रं हुत्वा द्वितीयाविष
येत् वक्ष्यमाणबिल्वदलेर्हुत्वा बलिं च वक्ष्यमाणद्रव्यैर्दत्त्वा शिष्यं धौतदंतायंस्नातं पंचगव्यं पाययित्वा कुंडांतिकं स्थंडिला
तिकं वा आनयेत् ततो मूलाभिमंत्रितदृष्ट्या तं विलोक्य तच्चैतन्यं तत्सहृदयाद्ब्रह्मरंध्राग्रे कुशाग्रमुद्रया समानीय स्वहृदि

ने० र
ता०
२८

संस्थाप्य षडध्वशोधनं कुर्यात् तद्यथा शिष्यपादयोः निवृत्तिप्रतिष्ठा विद्या शान्ति शान्त्यतीतात्मकं कलाध्वानं ध्याये
त् लिङ्गे तत्त्वाध्वानं तत्त्वाध्वानं तद्देवताभेदेन भिन्नं तद्यथा शिवशक्तिसदाशिवईश्वरविद्या एतानि पञ्चशुद्धानि तत्त्वा
नि माया काल नियति कला अविद्या राग पुरुष सप्तशुद्धानि प्रकृति बुद्धि अहंकार मनः श्रोत्र त्वक् च
क्षुर्जिह्वा घ्राण वाक् पाणि पाद पायु उपस्थ शब्द स्पर्श रूपरसे गन्धआकाश वायुअग्नि जल पृथ्वी चतुर्विं
शतिरशुद्धानि आत्मकानि षट्त्रिंशत्तत्त्वरूपशैवतत्त्वाध्वा जीवप्राण बुद्धि मनः श्रोत्र त्वक् चक्षुः जिह्वाघ्राण वाक्
पाणि पाद पायु उपस्थ शब्दस्पर्श रूप रस गन्ध आकाश वायु अग्नि जल पृथ्वी हृत्पद्म सोम सूर्य अग्नि वा
सुदेव संकर्षण प्रद्युम्न अनिरुद्धाख्यानि द्वात्रिंशत्तत्त्वरूपवैष्णवतत्त्वाध्वा आकाश वायु अग्नि जलपृथ्वी शब्द स्प
र्श रूप रस गन्ध श्रोत्रत्वक् चक्षु जिह्वाघ्राणवाक् पाणि पाद पायु उपस्थ मनो हंकार बुद्धि प्रधानाख्या
नि चतुर्विंशतितत्त्वरूप सौरतत्त्वाध्वा निवृत्ति प्रतिष्ठा विद्याशान्ति शान्त्यतीता बिन्दुकला नाद शक्ति सदा
शिवाख्यानि दशतत्त्वरूपशाक्ताध्वा प्रतिष्ठाविद्या शान्ति शान्त्यतीता बिन्दु कला नाद शक्ति सदाशिव आत्म
विद्याशिव शिवविद्या आत्म सर्वतत्त्वाख्यानि सप्तदशतत्त्वरूपवैश्वरतत्त्वाध्वा एवं तत्तद्देवताविषये तं तमध्वानं ध्यायेत्
नाभौ अतल वितल सुतल महातल तलातल रसातल पाताल भूः भुवः स्वः महः जनः तपः सत्यलोकात्म २८

28

कचतुर्दशभुवनरूपं भुवनाध्वानं ध्यायेत् हृदये अकारादिक्षकारान्तवर्णैकदेवरूपं वर्णाध्वानं ध्यायेत् ललाटे मू
लमन्त्रस्य वर्णसमुदायरूपं पदाध्वानं ध्यायेत् शिरसि समुदायमयं मूलमन्त्रस्वरूपं मन्त्राध्वानं ध्यायेत् इति [illegible] शरी
रे अध्वषट्कं ध्यात्वा कूर्चेन स्पृशन् गुरुः ॐ अमुकस्य कलाध्वानं शोधयामि स्वाहा एवं हुतैः पूर्णाहुतीं दत्वा कलाध्वानं तत्त्वा
ध्वनि लीनं विभाव्य ॐ अमुकस्य तत्त्वाध्वानं शोधयामि स्वाहा ८ तत्त्वाध्वानं भुवनाध्वलीनं विभाव्य ॐ अमुकस्य भुवना
ध्वानं शोधयामि स्वाहा ८ भुवनाध्वानं वर्णाध्वनि लीनं विभाव्य ॐ अमुकस्य वर्णाध्वानं शोधयामि स्वाहा ८ वर्णाध्वानं
पदाध्वनि लीनं विभाव्य ॐ अमुकस्य पदाध्वानं शोधयामि स्वाहा ८ पदाध्वानं मन्त्राध्वनि लीनं विभाव्य ॐ अमुकस्य मन्त्रा
ध्वानं शोधयामि स्वाहा ८ एवं हुतैः पूर्णाहुतीं दद्यात् एवमध्वषट्कं विशोध्य मन्त्राध्वानं ब्रह्मरन्ध्रस्थपरमशिवे लीनं विभा
वित्य पुनः संहृतिप्रतिलोमेन परमशिवसकाशात् मन्त्राध्वानं सृष्ट्वा ततः पदाध्वानं तस्माद्वर्णाध्वानं ततो भुवना
ध्वानं ततस्तत्त्वाध्वानं ततः कलाध्वानं सृष्ट्वा तत्तत्स्थाने संस्थाप्य शिष्यं मूलाभिमन्त्रितदिव्यदृष्ट्या विलोक्य स्वस्थितं
शिष्यचैतन्यं तद्धृदयारविन्दे आवाहनोक्तप्रकारेण ब्रह्मरन्ध्रमार्गेण संयोज्य स्रुचा वौषडन्तेन मूलमन्त्रेण पूर्णाहु
तिं दत्वा प्रोक्षणीजलैर्दक्षिणपश्चिमोत्तरेषु परिस्तरणकुशान् विधिपावकं परिधिं आत्मनि संयोज्य परिधिदेवताः विसृ
ज्य पश्चिमे परिधिं परिहृत्य दक्षिणोत्तरौ परिधी संहृत्य वह्नौ निदधीयेत् ततो वौषडिति मन्त्रेण वामसमा शिष्यस्य नेत्रे वेधयित्वा

मं॰र
त्ना॰
२९


कवेतेगृहीत्वाकुंडतोमंडपंनयेत् ततशिष्यांजलिंपुष्पैरापूर्य सांगायैसपरिवारायैअमुकदेवतायैनमइत्युक्त्वाकलशेक्षेप
येत् ततोनेत्रबंधमपनीयदर्भैसमुपवेश्य भूतशुद्धिमातृकान्यासादिशिष्यतनौविधाय पंचोपचारैःकुंभस्थांदेवतांसंपू
ज्य षडंगन्यासेनसकलीकृत्य अलंकृतंशिष्यमस्मिन्मंडलेश्रीपर्ण्यादिपीठेसमुपवेशयेत् ततोवाद्येषुनदत्सुविप्राः
शिष्यासहकुंभमुत्थाप्यपल्लवान् शिष्यशिरसिनिधायविलोममातृकांमूलंचजपन् मूलाभिमंत्रितैःकुंभतोयैरभि
षिंचेत् ततोवर्द्धनीजलैःसिंचेत् अवशिष्टजलेनशिष्यमाचमयेत्च तद्देहेसकलीकुर्याच्च ततःशिष्यउत्थायविमले
29 वाससीपरिधायालंकृतशरीरो गुरोःपादौवस्त्रहस्ताभ्यामुपस्पृश्य तद्दक्षिणतस्तिष्ठेत् ततोगुरुर्देवताशिष्यसंक्रां
तांविचिंत्यदेवताशिष्ययोरैक्यंसंभावयन् पूजयेत् ततोवक्ष्यमाणान्दशसंस्कारान्मनोर्विधायशिष्यशिरसिहस्तंद
त्वा अष्टोत्तरशतंजप्त्वा शिष्योब्राह्मणश्चेत्तद्धस्तेकुशान्सतिलयुतजलंदत्वाएषाममुकमंत्रःप्राप्योस्समानफलकोस्त्वितिवदे
त् शिष्योप्यस्त्वितिवदेत् ततोगुरुःऋष्यादियुतंमंत्रंशिष्यदक्षकर्णेत्रीन्मूर्द्धयोस्त्ववामकर्णेत्रिःकथयेत् अमुकानं
दनामासीतिनामचकुर्यात् ततःशिष्योष्टोत्तरशतंकृत्वामंत्रंजप्त्वागुरुदेवतामंत्राणामैक्यंविभावयन् दंडवत्प्रणमेत् गु
रुपादौशिरसिधारयेत् पिता गुरुंगंधादिभिःसंपूज्य कुशान्तिलजलान्यादाय ॐअद्यपूर्वोक्तैतदमुकमंत्रग्रहणप्रतिष्ठार्थमि
दंहिरण्यमग्निदैवतं भूमिंविष्णुदैवतां वस्त्रंबृहस्पतिदैवतं अमुकगोत्रायामुकशर्मणेगुरवेदक्षिणांतुभ्यमहंसंप्रदे २९

इति यथाविभवं दक्षिणां दद्यात् शरीरमर्थं प्राणांश्च गुरवे निवेदयेत् कलशाद्युपकरणानि निवेदयेत् ततः प्रभृति तान्नित्यं
कुर्यात् ब्राह्मणेभ्योऽन्नादि दत्वा द्विदिने निरामिषाम्लिषेत् वीरदीक्षायां तु भूतशुद्धिमातृकान्यासषोढान्यासादिकं सर्वं गु
रुः स्वशरीरे शक्तिशरीरे च विधाय कलशस्थापने श्रीपात्रस्थापने च हृतीयागक्रमेण कुंडगोलद्रव्यमादाय संस्कृत्य मत्
स्यमांसादेरपि संस्कारं कृत्वा पूजाक्रमेण देवतां संपूज्य शिष्याय मंत्रदानसमये शिष्यहस्ते वीरपात्रं दत्वा इदं पवित्रममृ
तं पीयतां भवभेषजं पशुपाशसमुच्छेदकारिणं भैरवोदितं इति गुरुः पठेत् शिष्योप्यनेनैव मंत्रेण पीयतामित्यत्र पिबा
मीति पठित्वा धर्माधर्महविर्दीप्ते आत्माग्नौ मनसा स्रुचा सुषुम्णावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहं स्वाहा इति पिबेत्
ततो गुरुर्मंत्रं दद्यात् तत्प्रकारस्तु ऋष्यादिसहितां मंत्रं लिखित्वाम्भमिमध्यगो पुष्पादिवासमभ्यर्च्य शिष्यायाथ प्र
दर्शयेत् यदि शिष्ये महाप्रीतिस्तदा कर्णे वदेद्गुरुः ततोप्यतितरां शिष्यो गुरोश्चेत्स्त्रीहि भाजने तदा गंडूषसर्वं हि दद्यादे
तो गुरुर्नमः निर्विकल्पोपि शिष्यस्तेन गृह्णीयाद्गुरोर्मुदा स्वः शेषं पश्चसमानमिति वीरदीक्षा द्वितीयाद्दीक्षायां तु गुरु
प्रातः स्थाप्य अष्टोत्तरसहस्रं अष्टोत्तरशतं अष्टाविंशतिं वा बिल्वदलैर्हुत्वा पायसकृशरमोदकशर्कराः नित्यपूजोक्त
बलिदानमंत्रेण बलिं दद्यात् शेषं पूर्ववत् इति क्रियावती दीक्षा अथ वर्णमयी तत्र स्वहृदि शिष्यचैतन्यस्थापनान्तेक
मेकतां शिष्यतनौ मातृकां न्यस्य ततः तन्न्यस्तानयुतान्वर्णान् प्रतिलोमेन संहृत्य शिष्यचैतन्यं मातृस्थिते परमा

त्मनिसंयोज्य तश्चैतन्यादकारादीन्वर्णान्त्याद्याशिष्यतनौक्रमेणपुनर्विन्यस्यचैतन्यंशिष्येनियोजयेत् ततःसूक्ष्माद्रूनिदा॰
नाचदिव्ब्रह्मरणान्ध्रदानांतेकर्मसमापयेत् इतिवर्णमयी अथकलावती तत्रस्वहृदिशिष्यंचैतन्यमस्यायनांतेकर्मकृत्वाशि
ष्यपादतलाजान्वपर्यंतेनिवृत्तिकलांध्यात्वा प्रावारात् ॐनिवृत्त्यैनमः इतिन्यसेत् एवमग्रेपि जानुनोर्नाभिपर्यंतम्
ॐप्रतिष्ठायैनमः नाभेराकंठं ॐविद्यायैनमः कंठाद्याललाटं ॐशांत्यैनमः ललाटाद्ब्रह्मरंध्रांते ॐशांत्यतीतायैनमः
पुनर्ब्रह्मरंध्राद्याललाटं ॐशांत्यतीतायैनमः ललाटाद्याकंठं ॐशांत्यैनमः कंठान्नाभिपर्यंते ॐविद्यायैनमः नाभे
र्जान्वपर्यंते ॐप्रतिष्ठायैनमः जानुनोःपादपर्यंते ॐनिवृत्त्यैनमः ततोदिव्यदृष्ट्याशिष्यविलोकनं तच्चैतन्यस्यायनादिब्र
ह्मरणान्ध्रदानांतेवर्णमयीकुर्यात् इतिकलावती अथवेधमयी तत्रदिव्यदृष्ट्याशिष्यविलोकनांतेकर्मकृत्वा शिष्यतनौ॰
मूलाधारेचतुर्दलेत्रिकोणस्थितांत्रिवलयांतडित्कोटिप्रभांशिवशक्तिमयींचैतन्यरूपांषट्चक्रभेदनक्रमेणपराशिवावधिग
कौंतींध्यात्वामूलाधारस्यवशषसवर्णान् तत्रस्थब्रह्मणिलीनान्विभाव्य ब्रह्माणंषड्दले स्वाधिष्ठाने तत्रस्थ बभम
यरल वर्णान् तत्रस्थविष्णौविलाप्यदशदलेमणिपूरे तत्रस्थ डढणतथदधनपफ वर्णान् तत्रस्थरुद्रे रुद्रंद्वादशदले
हृदंबुजे ततस्थ कखगघङचछजझञटठवर्णान् ईश्वरे ईश्वरंषोडशदलेकंठांबुजे तत्रस्थषोडशस्वरान् सदाशि
वे सदाशिवंद्विदलेभ्रूपंकजे तत्रस्थौ हक्षौ बिंदौबिंदुं कलायांकलां नादेनादं नादांतेनादांतं उन्मन्यां उन्मनीं विसु ३०

चक्रे त्रिस्रचक्रे गुरुचक्रे ततः स्वात्मना सह सशक्तिं परमशिवे वेधयेत् एवं छिन्नपाशः शिष्यो भुवि पतेत् दिव्यबोधश्च
भवति ततः पूर्णाहुतिदानादिकर्म समापयेत् इति वेधमयी अथैवं कर्तुमशक्तश्चेत् मण्डपाशक्तौ क्वचित्पशालस्थलेश
गणमण्डले कृत्वा तदशक्तौ चतुरस्रवृत्तवेष्टितकमले निर्माय तत्रोक्तविधिना कलशं संस्थाप्य कुण्डाशक्तौ स्थण्डिले कृत्वा त
त्र विस्तराग्निस्थापनाशक्तौ नित्यहोमक्रमेणाग्निस्थापनं विधाय उक्तविधिना होमादिकं कृत्वा शिष्यमभिषिच्य मन्त्रं दद्यात् उ
तिसंक्षेपदीक्षा अथ संस्थापने कृत्वा तत्राष्टवारं मूलेन जप्तेन जलेन शिष्यमभिषिच्य तत्कर्णे मन्त्रं कथयेत् वेदसूक्तं यद्धेतीर्था
सिद्धक्षेत्रे शिवालये मन्त्रमात्रप्रकथनमुपदेशः स उच्यते इत्युपदेशविधिः अथ पूर्णाभिषेकः शिष्यस्य जन्मनक्षत्रदिने शु
येऽष्टदलपद्मं विलिख्य सर्वतोभद्रमण्डलं वा तत्कर्णिकायां पलहृदये तत्पृष्ठिति द्विगुणाकुण्डवेमते चतुर्भिः कुण्डवैः प्रस्थः पूर्ण।
चत्वारः प्रस्थाः आढकः आढकैस्तैश्चतुर्भिश्च द्रोणः स्मृतः कथितो बुधैः कुम्भो द्रोणद्वयं पूर्वं स्याद्द्रोणास्तु षोडश्याः इदं खारीमानेन यद्य पुक्ते
तथापि धान्यमानेन विशेषतो बोध्यं खारीतोयपूर्णकलशं संस्थाप्य दलेषु अष्टकलशान् स्थापयेत् तद्विधिस्तु पूर्वमुक्तः मध्यकुम्भे इष्टदे
वतां अन्येषु अङ्गावरणदेवताः समावाह्य पूजयेत् ततो गुरुः स्वकृते वह्नौ सहस्रं हुत्वा कालशाम्बु स्वपल्लवैः कलशाम्बुज
लेन पूर्वसंस्कारविशिष्टशिष्यं वक्ष्यमाणमन्त्रैरभिषिञ्चेत् अथाभिषेकमन्त्राः सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः वासुदे
वो जगन्नाथस्तथा संकर्षणो विभुः प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते आखण्डलोऽग्निर्भगवान् यमो वै नैर्ऋतिस्तथा वरुणः

पवनश्चैव धनाध्यक्षस्तथा शिवः ब्रह्मणा सहितास्सर्वे दिक्पालाः पान्तु ते सदा कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः
बुद्धिर्लज्जा वपुः शान्तिर्माया निद्रा च भावना एतास्त्वामभिषिंचन्तु तुष्टिः कान्तिश्च मातरः आदित्यश्चंद्रमा भौमो बुधजीवसितार्कजा :
ग्रहास्त्वामभिषिंचन्तु राहुः केतुश्च पूजिताः देवदानवगंधर्वा यक्षराक्षसपन्नगाः ऋषयो मनवो गावो देवमातर एव च देव
पत्न्यो ध्रुवा नागा दैत्याश्चाप्सरसां गणाः अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च औषधानि च रत्नानि कालस्यावय
वाश्च ये सरितः सागराः शैलास्तीर्थानि जलदा नदाः एतेनामभिषिंचन्तु सर्वकामार्थसिद्धये मूलमंत्रेण वाभिषिच्य अम
कानेदनाघ्ना मासीति वदेत् खारीलक्षणं पलद्वयेन प्रसृतिः कुडवे द्विगुणं भवेत् चतुर्भिः
कुडवैः प्रस्थश्चाढकस्तैश्चतुर्गुणैः चतुर्गुणो भवेद्द्रोणः कुंभस्तद्द्वय एव स्मृतः कुंभैस्तैरष्टभिः खारी
ति इति पूर्णाभिषेकः अथ मंत्राणां दशसंस्काराः तत्र त्रिकोणं विलिख्य तत्समधा विभज्य पुनः स
मधा कुर्यात् एवमेकोनपंचाशत्त्रिकोणानि भवन्ति तत्र ईशानादि पश्चिमान्ते मातृकावर्णान्विलि
ख्य तत्र देवीं प्रपूजयित्वा ततो मंत्रं समुद्धरेदिति जननं १ हंसपुटितं मंत्रं सहस्रं जपेदिति दीपनम् २ ह्रूं
इति पुटितं मूलं एवं सहस्रं जपेदिति बोधनं ३ फट् इति संपुटितं मंत्रं सहस्रं जपेत् इति ताडनं ४ ऐं हंसः गें इति
मंत्रेण सहस्रवारं जप्तेन जलमभिमंत्र्य तेन जलेन मंत्रमभिषिंचेदित्यभिषेकः ५ श्रीं ह्रीं वषट् इति संपुटितं मंत्रं सह



श्रीः

स्त्रंजपेदितिविमलीकरणं ६ यंवौषट् इतिसंपुटितेमंत्रेसहस्रंजपेत् इतिजीवने ७ दुग्धघृतजलैर्वा ॐ अमुकमंत्रंतर्पयामिइति
अष्टोत्तरशतवारैस्तर्पयेदितितर्पणं ८ ह्रीं इतिसंपुटितेमंत्रेपंचसहस्रंजपेदितिगोपनं ९ श्वेतचेद्रान्त्रग्रहैंडसंपुटितेमंत्रमष्टोत्तरश
तवारंजपेदित्याप्यायने १० इत्येतेमंत्रदोषशोधकादशसंस्काराः पीठादौकुंकुमगोरोचनादिना मातृकांविलिख्यत्रिकोणस्यामध्ये
मातृकावर्णांङ्कृत्यमंत्रंविलिखेदितिजनने १ मूलमंत्रस्यप्रत्येकवर्णान् प्रणवांतरितान्कृत्वा अष्टोत्तरशतवारंजपेत् [illegible]
ॐ ह्रां ॐ म ॐ इतिजीवने २ स्ववर्णादिपात्रेकुंकुमगोरोचनादिना मंत्रवर्णान्विलिख्य यमितिवायुबीजेनचंदनोभसा [illegible] कुश
तवारंताडयेत् इतिताडने ३ कुंकुमगोरोचनादिनामंत्रंविलिख्यमंत्राक्षरसमसंख्याकाश्वत्थपल्लवैःकलशस्थजलैः [illegible]
अमुकमंत्रस्यामुकाक्षरमभिषिंचामिइत्यभिषेकः ५ ॐ ह्रीं इतिमंत्रेणमूलाधारात्कुंडलिनीमुत्थाप्यतद्द्वारामंत्रस्यसहस्रं
केमायामयंमलत्रयंदहेदितिविमलीकरणं अत्रयोनिमुद्रावेष्टनवदपानवायुमूर्द्धमाकृष्य तडित्स्थितेस्तेजोमिश्रंदहनमा
मलीकरणम् ६ कुंकुमगोरोचनादिनामंत्रंविलिख्यकुशोदकेन ॐ ह्रीं इतिमंत्रजपेन मूलमंत्रस्यप्रत्यर्णं इतिप्रोक्षणमाप्याय
ने ७ जलेनमूलमंत्रेणअमुकमंत्रंतर्पयामीतिअष्टोत्तरशतवारंतर्पयेदितितर्पणं ८ ॐ ह्रीं श्रीं इतिजाम्यादौदत्वायथाशक्तिज
पेदितिदीपने ९ जप्यमानस्यमंत्रस्याप्रकाशनंगोपने इतिशारदातिलकोक्तमंत्रदशसंस्कारविधिः अथानिष्टफलदमंत्रत्या
गविधिः तत्रसाधकश्शमेदिनेशुचिः कृतनित्यक्रियः ॐ अद्येत्यादिअनिष्टफलदामुकमंत्रपरित्यागमहंकरिष्ये इतिसंक



मे॰र
त्ना॰
३२

स्य शुभेभवने दीक्षाविधानक्रमेणकुंभेसंस्थाप्यविलोममंत्रपाठेनजलेनसमापूर्य्यतत्रेष्टदेवमावाह्यसकलीकृत्यसंपूज्यावरण
निवपूजयेत् ततोग्निंसंस्थापयित्वाविलोममंत्रेणगोक्षीरयिषाज्येनरसहस्रंशतेनवाहुत्वाउग्रान्नैर्दशसादिक्षुवलिंदद्यात् ततयथा
आयाहीइन्द्रसुराधीशप्राप्तमस्योशवीपते नमस्तुभ्यंगृहाणेमंपुष्पधूपादिकंवलिं यषड्गंधाद्यवलिरिंद्रायनमः इतिदद्यात् एवं
सर्वमंत्रान्तेप्रयोगः प्रेतराजसमायाहि भित्राजनसमप्रभुते वलिंदत्तंगृहीतेमंसुप्रीतोवरदोभव नमस्तेरक्षसोनाथनिर्ऋतेते
मिहागतः गृहाणवलिपूजादिमयाभक्त्यानिवेदितं एहियश्चिमदिक्पालजलनाथनमोस्तुते भक्त्यानिवेदितांपूजांगृहीत्वाप्रदे
तिमामपूर्याहि प्रभंजनमागम्यतेनमेहिसमंपरिच्छदः मयाप्रयुक्तंविधिवत्गृहाणवलिमादरात् कुवेरनारकाधीश [illegible]
स्वैरात्रमो पुष्पधूपादिभिः प्रीतोभवेतावरदोमम ईशानमेहिभगवन्सर्वविद्याश्रयाप्रभोपूजितः पुष्पधूपाद्यैः [illegible]
विभूतये आयाहिसर्वलोकानांनाथब्रह्मन्समर्चने गृहाणसर्वविघ्नान्मेनिवर्त्तेननमोस्तुते आगच्छवरदा [illegible] सोवि
श्वस्यनायक पूजितःपरयाभक्त्याभवत्वंसुवरदोमम इतिवलीन्दत्वासपरिवारांदेवतांसंपूज्यवरंप्रार्थयेत् तद्यथा [illegible]
त्वमनालोक्यमयातरलबुद्धिना यदपातेसजितंतचप्रभोमेत्रसरूपकं तेनमेमनसःक्षोभमशेषंविनिवर्त्तय [illegible]
स्त्वपूजाश्चयःसनातनं ततोत्वममकल्याणंपावनीभक्तिरेवते इतिसंप्रार्थ्य कस्मिंश्चित्तत्रैवविलोमक्रमेणपूर्वक [illegible] आम
त्रेलिखिता कलशोपरिसंस्थाप्यपूजयेत् ततस्तत्रत्रिशिरसिवध्वापूजितकुंभजलैःस्नापयेत् ततोमन्त्रजलैः [illegible] स्थापित

तस्याध्येमैंनिःशिष्यस्वपिता तेकुंभेनदीतीरे अथवान्यशोभनेजलाशयेनिक्षिपेद्दक्षिणांचदद्यात् ब्राह्मणांश्चभोजये
त् इत्थंकृतविधानस्यरिपुमंत्रोद्भवारुजः नश्यत्येवनसंदेहः क्रमाच्चित्तप्रसन्नता जायतेतीवसंपन्नोवर्द्धतेचकुलेक्रमात्
इत्यनिष्टमंत्रत्यागविधिः अथगुरुभक्तिः फलास्यैव नारायणेमहादेवेमातापित्रोश्चराजनि यथाभक्तिर्भवेद्देवितथाका
र्यानिजेगुरौ तथा एकग्रामस्थिताशिष्यास्त्रिसंध्यंप्रणमेद्गुरुं एककोशस्थितश्चापिगुरुंप्रतिदिनेनमेत् अर्द्धयोजनगा
शिष्यःप्रणमेत्पंचपर्वसु एकयोजनमारभ्ययोजनद्वादशावधि तत्तद्योजनसंख्यातेमासेगत्वानमेद्गुरुं अतिदूरेस्थितःशि
ष्यायदेच्छास्यात्तजेत्तदा रिक्तहस्तोनोपेयाद्राजानंदैवतंगुरुं फलपुष्पांबरादीनियथाशक्त्यासमर्पयेत् तथा गुर्वग्रेन
तपःकुर्यान्नस्नायाद्वात्मशुद्धये ननियोगंगुरोर्देयाद्युष्मदानाभिभाषयेत् तथा ऋणदानेतथादानेवस्तूनांक्रयविक्र
ये नकुर्याद्गुरुभिःसार्द्धंशिष्योभूत्वाःकदाचन गुरोःसन्निहितेयस्तुपूजयेदन्यमेवहि सयातिनरकंघोरंपूजासाविफलाभ
वेत् यस्मिन्देशेगुरोरस्तिस्पृहानानुभवेत्क्वचित् अवश्यंयदिवांछास्यात्तदन्यत्रयात्तदानया अत्यल्पेहिगुरौईर्ष्यमदत्तेसौक
रोतियः तिरश्चांयोनिमापन्नःकल्पांतेमेदतेप्रिये गुरुद्रव्याभिलाषीचगुरुस्त्रीगमनोत्सुकः पतितःस्यान्नसंदेहःप्राय
श्चित्तेनविद्यते गुरुस्थानेसंप्रदायेतद्धर्मंयोनिवारयेत् गुरुभिःसहबहिःकार्यादेशोवदेत्स्वयातकी पादुकामासनंचवस्त्र
वाहनेछत्रचामरे दृष्ट्वागुरोर्नमस्कुर्यान्नतद्भोगायकल्पयेत् उक्तानुक्तेषुकार्येषुनोपेक्षांकारयेत्प्रिये सदसद्यद्गुरुर्ब्रूयात्

मं॰र॰
त्ना॰
३३

33

कार्यमविशंकया वस्त्रहर्म्याशनेक्रवागुर्वाज्ञांपरिपालयेत् नविप्रोदासनेदेविदेवताग्रेगुरुसन्निधौ जातिविद्याधनाद्यो
वाहरेद्वक्षागुरोर्मदा दंडप्रणाममेकुर्वीतत्रिः प्रदक्षिणमाचरेत् तथा गुरुस्तद्गुरुयोगेतद्वंदेतप्रगुरुंप्रिये ततोनमेद्गुरुं
सोपिगुर्वग्रतेनिवारयेत् प्रगुरोः सन्निधौशिष्यः प्रगुरुंमनसानमेत् श्रीगुरुंनत्यजेत्कापितदादिष्टोव्रजेत्प्रिये अथ
स्थितेगुरावूर्द्धेनतिष्ठेत्तुकदाचन नगच्छेदग्रतस्तस्यनतिष्ठेदास्थितेगुरौ तिष्ठेदुपविष्टइतिशेषः यत्रश्रीगुरुनिंदास्यात्
पिधायश्रवणेतस्के सपदस्मादपक्रामेद्दूरेणप्रणपायथा गुरुनामजपेत्यस्मात्श्रवणेसाप्रतिक्रिया गुरुमित्र
सुहृद्दासीदासायाश्चावमानयेत् गुरुशक्तिसुतस्तत्रोज्येष्ठोभ्रातागुरोःसमः आत्मवत्पूजनीयास्तःपुत्रवत्कुलपा
लकाः उपचर्याप्याम्मितिशेषः इतिश्रीराघवानंदकृतायांपद्धतिरत्नमालायांदीक्षारत्नेप्रथमं अथनित्यकृत्यानि प्रा
तःकृत्येनित्यरत्नेस्नानसंध्येष्टतर्पणं पूजानुक्रमणीपूजातत्सदेयस्ततःपरं स्वीकारःकारणस्साधनहृतीयजनंपद्धतिः
यंत्रस्पमालिकायाश्चसंस्कृयोकासमासतः अथप्रातःकृत्यम् तत्रसाधकोब्राह्मेमुहूर्त्तेउत्थाय शय्यायामेवोपवि
श्यबद्धपद्मासनः श्लेष्मातकरंजेवनिंबाश्वत्थकदंबके बिल्ववटशालतालमालिटेकजरेतथा इतिकुलवृक्षा कुल
वृक्षंप्रणम्य स्वशिरस्थितसहस्रदलकमलकर्णिकामध्यवर्ती चंद्रमंडलांतर्गतत्रिकोणस्थितंस्वगुरुंध्यायेत् नीला
बरंनीलविलेपनंस्रकेशाद्यादिभूषितनेत्रमदितेद्विनेत्रे वामांकपीठस्थितनीलशक्तिंवंदामिवीरंकरुणानिधानं इतिध्या ३३

तामानसोपचारैः संपूज्य ऐं ह्रीं श्रीं हसखफ्रें हसक्षमलवरयूं हसखफ्रें हसक्षमलवरयीं हंसः सोऽहं श्रीअमुकानंदनाथ
श्रीअमुकदेव्यंबाश्रीपादुकां पूजयामि इति गुरुपादुकामंत्रेण दशधा सप्तधा वा पूजनम् श्रीगुरोर्दक्षिणकरे ॐ गुह्यातिगुह्य
गोप्ता त्वं गृहाणास्मत्कृतं जपं सिद्धिर्भवतु मे देव त्वत्प्रसादात्सुरेश्वरेति समर्प्य अखंडमंडलाकारं व्याप्तं येन चराचरं तत्पदं
दर्शितं येन तस्मै श्रीगुरवे नमः इति दंडवत्प्रणमेत् ततो नमस्ते नाथ भगवान् शिवाय गुरुरूपिणे विद्यावतारसंसि
द्ध्यै स्वीकृतानेकविग्रह नवाय नवरूपाय परमार्थैकरूपिणे सर्वाज्ञानतमोभेदभानवे चिद्घनाय ते स्वतंत्राय दयाक्लृप्त
विग्रहाय शिवात्मने परतंत्राय भक्तानां भव्यानां भव्यरूपिणे संसारयात्रामनुवर्त्तमानो नादाद्यपारदक्षिणका
लिकेति अज्ञानतिरस्कारकलिप्रमादभयानि मा माभिभवंतु मा न इति प्रार्थ्य कुंडलिनीं पुनस्तेनैव पथा मूलाधारमा
नीय तादात्म्यमधिभावयेत् प्रकाशमानां प्रथमे प्रयाणे प्रतिप्रयाणेप्यमृतायमानां अंतःपदव्यामनुसंचरंतीमानंदरूपा
मबलां प्रपद्ये इति कुंडलिनीं भावयेत् अहं देवो न चान्योस्मि ब्रह्मैवाहं न शोकभाक् सच्चिदानंदरूपोहमात्मानमिति चिंतये
त् इति गुरुदेवात्मनामैक्यं विभाव्य अजपाजपसंकल्पं कुर्यात् अस्य अजपामंत्रस्य हंस ऋषिरव्यक्तगायत्री छंदः परम
हंसो देवता योगसिद्धौ विनियोगः इति न्यस्य हंसऋषये नमः शिरसि अव्यक्तगायत्रीछंदसे नमः मुखे परमहंसाय देवता
यै नमो हृदि इति न्यस्य सूर्यात्मने अंगुष्ठाभ्यां नमः सोमात्मने तर्जनीभ्यां स्वाहा निरंजनाय मध्यमाभ्यां वषट् निराभासा

गुदमेढ्रान्तराले   लिङ्गमूले

यअनामिकाभ्यां हुं अयक्षायकनिष्ठाभ्यां वौषट् अनेतायकरतलपृष्ठाभ्यां फट् एवं हृदयादिषु गणेशादावजपाजपं
मे॰र समर्पयेत् षट्शतं तमजपाजपं गणेशाय समर्पयेत् तद्यथा मूलाधारे चतुर्दले वंशंषंसं बीजयुक्ते रक्तवर्णाय गणेशाय
त्ना॰ षट्शतमजपाजपं समर्पयामि षट्सहस्रमजपाजपं गायत्रीसहिताय ब्रह्मणे समर्पयेत् ततः स्वाधिष्ठाने विद्रुमाभे षट्
२४ दले बंभंमंयंरंलं बीजयुक्ते रक्तवर्णाय सावित्रीसहिताय ब्रह्मणे षट्सहस्रमजपाजपं समर्पयामि षट्सहस्रमजपाज
पं लक्ष्मीसहिताय नारायणाय नारायणाय समर्पये नाभौ मणिपूरे विद्युत्तेजप्रभाभे दशदले डंढंणंतंथंदंधंनंपंफं बीजयुक्ते
३५ अतसीपुष्पवर्णाय लक्ष्मीसहिताय नारायणाय षट्सहस्रमजपाजपं समर्पयामि षट्सहस्रमजपाजपं उमासहि
ताय महेश्वराय समर्पये हृदये अनाहते महानीलप्रभाभे द्वादशदले कंखंगंघंङंचंछंजंझंञंटंठं बीजयुक्ते शुद्धस्फटिकवर्णा
य उमासहिताय महेश्वराय षट् सहस्रमजपाजपं समर्पयामि सहस्रमजपाजपं प्राणशक्तिसहिताय आत्मने समर्प
कण्ठस्थे ये विशुद्धे धूम्रवर्णे षोडशदले अंआंइंईंउंऊंऋंॠंऌंॡंएंऐंओंऔंअंअः बीजयुक्ते प्राणशक्तिसहिताय ज्योतिप्रकाश
यात्मने सहस्रमजपाजपं समर्पयामि सहस्रमजपाजपं परशक्तिसहिताय परमात्मने समर्पये आज्ञाचक्रे विद्युदाभे भ्रूमध्ये
द्विदले हंक्षं बीजयुक्ते परमशक्तिसहिताय परमात्मने सहस्रमजपाजपं समर्पयामि सहस्रमजपाजपं गुरवे समर्प
ये सहस्रारे कर्पूराभे सहस्रदलकमले गुरवे सहस्रमजपाजपं समर्पयामि ततः समुद्रमेखले देवि पर्वतस्तनमण्डले २४

विसृज्य नित्यमसृक्भिं पादस्पर्शं क्षमस्व मे देहात् स्नानसारेण भस्मौघपदे निधाय मूलेन यथाशक्ति जपेदिति स्नातः कृत्वे सुधा
सेवेत कलहत्वक्षणमेकृत्वा गुहे वीक्ष रूपं श्रवणमस्य तन्मा डकामे त्रेजप्ता देवीं ध्यात्वा मूलजपाजपसमर्पणं च कृत्वा
स्नानत्रयं भस्मौघपदे निधाय चिताभस्मानुलेपनं कृत्वा मूलमष्टोत्तरशतं जपेदेवं स्नातः कृत्यसमाप्य इदं वावश्यपकेत
डकं यामले स्नातः कृत्यमकृत्वा च यो देवीं भक्तितो नार्चयेत् पूजा च विफला तस्य शोचहीना यथा क्रिया अथ स्नानम्
फडिति कुशमृद्यामृदं गृहीत्वा फडित्यभिमंत्र्य तेनैव शोधिता शिखां मंत्रेण शोधयित्वा मूलेनाभिमंत्र्य जलतीरे गत्वा
अस्त्रेणातीरे प्रदाय मृदा कुशगोमयतिलानभिमंत्र्य चिताभस्मापयित्वा अपराङ्गं मृदा उद्धृतोदकेन बहिर्मलापकर्षकं
स्नानं च कृत्वा ततोऽत्रिकं कुर्यात् तत्र पादौ प्रक्षाल्य हि...वमप्यजलपूर्णं पात्रे जवापुष्पतिलकुशगन्धान् निनिःक्षिप्य ॐ
अधेहेत्यादि संकल्प्य मूलेन प्राणायामत्रयं ऋष्यादिन्यासांश्च कृत्वा नीत्वा मूर्द्धाममपेन मस्तकात्पादपर्यंतं विलिप्यना
भिमात्रोदके त्रिर्निमज्योन्मज्याचम्य मायाबीजेन जलमालोड्य तेन सकलीकरणं मुद्राबद्धा वांमिति धेनुमुद्रयामृतीकृ
त्य ॐमित्यवगुण्ठ्य फडिति संरक्ष्य एकादशवारं मूलेनाभिमंत्र्य ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे तेन सत्येन देवेश
तीर्थं देहि दिवाकर इति सूर्यं प्रार्थ्य ॐ गंगे च यमुनादितानि तीर्थान्यावाह्य अंकुशमुद्रया सर्वानन्दमयीमशेषदुरितध्वंसाम्
गोकप्रभां मत्स्यावाङ्कुरद्वयेन दधतीं पाशं सृणिं च क्रमात् दोर्भ्यां वामेतरेण हेमकलशं हृद्यान्तमालां वरां गां·

मे॰ र॰
त्ना॰
३५

35

सिंधुसरिद्वरादिसहितां श्रीतीर्थशक्तिं भजे एवं तीर्थशक्तिं ध्यात्वावाह्य ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः सर्वानंदमये तीर्थशक्ते एह्येहि
स्वाहा इति संपूज्य ॐ नमो भगवति गंगे वेत्रविके महामालिनि एह्येहि भगवति अशेषतीर्थालवाले ह्रीं श्रीं शिवजटा
धिरूढे गंगे गंगे गांगिके स्वाहा इति मंत्रवारमभिमंत्र्य तद्देवतापीठं संचिंत्य तद्देवतामावाह्य सांगां सावरणां तां जले संभाव्य
तत्पादनिर्गतं तज्जलं संचिंत्य मूलं संस्मरन् त्रिः कृत्वा मूलेन कुंभमुद्रया त्रिः प्रोक्ष्य ॐ आत्मतत्वेन स्थूलदेहं शोधयामि स्वाहा
ॐ विद्यातत्वेन सूक्ष्मदेहं शोधयामि स्वाहा ॐ शिवतत्वेन परदेहं शोधयामि स्वाहा इति त्रिराचम्य मूलेन देवतां संतर्प्य
तां हृदये तीर्थशक्तिं सूर्यमंडले उद्वास्य धौतवाससी परिदध्यात् इति स्नाने अपरोपि प्रकारः तत्र मृत्तिकां स्ववर्णरजत
मृत्ताम्रपात्रकुशांश्च गृहीत्वा जलांतिकं गत्वा देवीरूपमात्मानं भावयन् मलापकर्षणं स्नानं कृत्वाचम्य जलपूर्णं स्वर्ण
रजतताम्रान्यतमपात्रं तिलाक्षतजपपुष्पाणि निक्षिप्य ॐ मयेत्यादि सप्रलोभ्य सहितं श्रीमदेकजटादेवीप्रीतये स्नानम
हं करिष्ये इति संकल्प्य जले मूलेन दक्षावर्तक्रमेण त्रिकोणं विलिख्य गंगे चेत्यादिना अंकुशमुद्रया दशमहाविद्याधिपतये तत्रैव
कुशत्रयपिण्डीं च कुशाख्यामुद्रया इत्येकत्रयपात्रं सूर्यमंडलात्तीर्थमावाह्य मूलेन त्रिराचम्य दक्षांगुष्ठेन परांगुष्ठेन माहल
ह्रदयेन तत्समावकाशं च एकमुष्टिं मुद्रे यं कुंभसंज्ञिका इत्येकत्रयपात्रकुंभमुद्रया मूलेनानेन त्रिः प्रोक्षयेत् ततो मूलं संस्मरन् त्रि
र्निमज्ज्य आत्मतत्वेन स्थूलदेहं शोधयामि स्वाहा विद्यातत्वेन सूक्ष्मदेहं शोधयामि स्वाहा शिवतत्वेन परदेहं शोधयामि॰ ३५

स्वाहा इत्याचमेत् इत्यौदकस्नानं अथ मांत्रं तोयाभावे तु यत्कार्यं दुर्गे काले वशी ततः गमनेदिप्रसिद्ध्यर्थं गुरुकार्येषु
तेवितः आग्नायपथपविप्रेइनिशाभागेतथाम्भने कुर्यादितिशेषः तत्रोद्धृतोदकेन हस्तौपादौप्रक्षाल्याचम्य स्थानेदश
दिशाम्बसेशोध्य आसनेसमुपविश्य रूः पिंगोग्रेकजटेश्वरस्नायफडितिकरयोर्विमृश्य मंत्रमात्रपूर्वकं सकलीकृतात्म
जालेकुर्यादितिमांत्रस्नानं अथमानसं तत्रमूलेनप्राणायामंकृत्वा आकाशस्थदेवताध्यात्वा तत्चरणोदकधारांसमुद्दि
प्लावयेत् ब्रह्मरंध्रेण शरीरांतर्गतांतर्गतोविभाव्यांतर्देहगतंमलंतयाक्षालयेत् तत्क्षणाद्विरजाक्ष्यात् उत्तराम्नाये
इदमेवप्रधानमितिमानसं ततोरक्तंवासःसोपवीतंधाय ॐमणिधरिवज्रिणिशिखरिणिसर्ववशंकरिणि हुंफट्स्वाहा
इतिशिखांबध्वा श्मशानभस्मनावित्रपुंड्रकं कुर्यात् अथवारक्तचंदनेनगोमयीचंदनेनवा भालेफडितिविलिख्यत्रिको
णंविलिखेत् हृदिक्लींवैविलिख्य त्रिकोणंविलिखेत् इतिवीरपदे पश्चात् वेदनादिनाद्वेशुद्धं कुर्यादितितिलकविधा
नं अथसंध्या आचम्याग्रसुविरात्पविश्यमूलेनप्राणायामत्रयंकृत्वाकरांगन्यासौचविधाय पुरतोजले वमितिधेनुमु
द्रयामृतीकृत्य मूलेनसप्तवारंअभिमंत्र्य अकारादिलकारांतेर्वर्णैः सबिंदुभिः प्रत्येकंतेनजलेनशिरःप्रोक्ष्य अथ
वामूलेनत्रिवारंप्रोक्ष्य वामहस्तेजलंगृहीत्वादक्षहस्तेनसंपुटीकृत्य हंयंवंलंरं इतिपंचबीजैःत्रिधाभिमंत्र्य गा
लितोदकबिंदुभिः अनामांगुष्ठयोगात्तथयातत्वमुद्रयामूलेनसप्तधाशिरःप्रोक्ष्य शेषंजलंदक्षहस्तेनिधायनासा

भैर
त्वा
३६

निकटेनीताः स्वनाडयाधारी यतः प्रवेशयं सकलपापं क्षालयित्वा कृष्णवर्णेन तदुदकं भावयित्वा दत्तनासापुटेन दक्षहस्तेन वि
रेच्य पापपुरुषं तदुदकं चिंतयित्वा पुरः कल्पितवज्रशिलायां ग्रसमंत्रेणाक्षिपेत् ततो ह्रां ह्रीं ह्रूं हंसः सूर्यमंडलस्थायै ग्र
सकदेव्यै नमः इति मंत्रेण गायत्र्या वा देव्यै ग्रर्घ्यं दत्वा ध्यायेत् उद्यदादित्यसंकाशं पुस्तकाक्षकरां स्मरेत् कृष्णाजि
नधरां ब्राह्मीं ध्यायेत्तारकितांबरे मध्याह्ने श्यामवर्णां वितवीं शंखचक्रकलसत्करां गदापद्मधरां देवीं सूर्यं विवक्त
ताश्रयां सायाह्ने मायाहे वरदां देवीं गायत्रीं संस्मरेद्यतः शुक्लां शुक्लांबरधरां हंसासनकृताश्रयां त्रिनेत्रां वरदां पा
शांकुशलेखात्मकरां शटिकां इति ध्यात्वा पश्चात् शक्तिगायत्रीं मूलेन जपेत् ओं भगवत्यैकजटे विकटदंष्ट्रे धीमहि तन्नो तारे प्र
चोदयात् ओं एकजटायै विद्महे ह्रीं नीलसरस्वत्यै धीमहि ह्रीं तारे प्रचोदयात् महोग्रतारायै विद्महे तारायै धीमहि
तन्नो देवी प्रचोदयात् एतास्वन्यतमां गायत्रीं सप्तविंशति दशाष्टो वारान् वा जपेत् इति संध्या अथ तर्पणम् जले
देवतापीठं विचिन्त्य तत्र पीठशक्तीः प्रत्येकं संतर्प्य तर्पणीयादेवादहायां तिल्लावाह्य ओं ब्रह्मभैरवस्तृप्यतां ओं विष्णु
भैरवस्तृप्यतां ओं रुद्रभैरवस्तृप्यतां हसक्षमलवरयूं आनंदभैरवाय वषट् आनंदभैरवस्तृप्यतां हसक्षमलवरयीं
सुधादेव्यै वषट् आनंदभैरवी तृप्यतां इति देवतर्पणं ओं रुद्रकेशानंदनाथस्तृप्यतां ओं व्योमकेशानंदनाथस्तृप्यतां
ओं नीलकंठानंदनाथस्तृप्यतां ओं वृषध्वजानंदनाथस्तृप्यतां एते दिव्यौघाः ओं वशिष्ठानंदनाथस्तृप्यतां ओं क्रमोत्त ३६

36

ण्योनेदनाथस्तु ॐमीननाथानेदनाथ· ॐमहेश्वरानेदनाथ· ॐहरिनाथानेदनाथस्तु· एतेसिद्धौघा ॐताराव
तेवस्येवास्तृप्यतो· ॐमानुमतेवास्तृप्यतो ॐजयावास्तु· ॐविधावा· ॐमहोदर्य्येवास्तु· ॐसुखानेदानेदना
थस्तु· ॐपरानेदानेदनाथस्तु· ॐपारिजातानेदनाथस्तृप्यतो ॐकुलेश्वरानेदनाथस्तु· विरूपाक्षानेदना
थस्तृप्यतो ॐफेरवेवात्· स्त्रियोदेवीनावातर्प्पयेत यथा ॐतारावतीदेवीतृप्यतामित्यादि एतेमानवौघाः
इतिदेवतर्प्पणं अथपितृतर्प्पणं गुरुपरमगुरु परापरगुरु परमेष्ठीगुरुनाथ्यनेदनाथशक्तीतान्तर्प्पयेत इ
देवतर्प्पणंतगुरौपरलोकगते इहास्थितेनस्मरणमात्रमित्यागमसंप्रदायः इतिपितृतर्प्पणं ततःसपरिवारांदेवी
ध्यात्वा मूलांते श्रद्धोभ्यसहितांश्रीमदेकजटादेवीतर्प्पयामिस्वाहा इतिवारदशवारंवासंतर्प्प श्रद्धाभ्येचत्रिःसंत
र्प्पे परिवारदेवीस्तर्प्पयेत ह्रांएकजटायैहृदयायनमः हृदयदेवतांतर्प्पयामि ह्रींतारिणेशिरसेस्वाहा शिरोदे
वतांतर्प्पयामि हूंवज्रोदकेशिखायैवषट् शिखादेवतांतर्प्पयामि हैंउग्रजटेकवचायहूं कवचदेवतांतर्प्पयामि ह्रौं
महापरिसरेनेत्रत्रयायवौषट् नेत्रदेवतांतर्प्पयामि ह्रः पिंगोग्रैकजटेअस्त्रायफट् अस्त्रदेवतांतर्प्पयामि स्वाहेति
सर्वत्रदेयमितिसंप्रदायः ततोमूलमन्त्रार्थंप्रथमावरणान्तिकांश्रीमदेकजटादेवींतर्प्पयामिस्वाहा इतिमूलदेवी
तर्प्पयित्वा द्वितीयावरणंतर्प्पयेत ॐविशालिंतर्प्पयामि ॐरतिंतर्प्पयामि ॐप्रीतिंतर्प्पयामि ॐप्रियांतर्प्पयामि

भै॰र
त्री॰
२७

37

ॐ कान्तिं तर्पयामि ॐ कामं तर्पयामि ॐ गायत्रीसहितं ब्रह्माणं तर्पयामि ॐ सावित्रीसहितं विष्णुं तर्पयामि ॐ वागीश्वरी
सहितं रुद्रं तर्पयामि ॐ कर्त्तकान्तं तर्पयामि ॐ चित्ताङ्गारं तर्पयामि ॐ कामेश्वरीं तर्पयामि ॐ दिक्करवासिनीं तर्पयामि
ॐ उन्नावर्धिकान्तं ततो मूलान्ते द्वितीयावरणात्मिकां श्रीमदेकजटादेवीं तर्पयामि इति मूलदेवीं संतर्प्य तृतीयावरणे
तर्पयेत् ॐ महाकालीं तर्पयामि ॐ रुद्राणीं तर्पयामि ॐ उग्रां तर्पयामि ॐ भीमां तर्पयामि ॐ भ्रामरीं तर्पया॰
मि ॐ महारात्रिं तर्पयामि ॐ भैरवीं तर्पयामि ततो मूलान्ते तृतीयावरणात्मिकां श्रीमदेकजटादेवीं तर्पयामि इति
मूलदेवीं संतर्प्य चतुर्थावरणे तर्पयेत् ॐ वैरोचनं तर्पयामि ॐ असितामं तर्पयामि ॐ पद्मनाभं तर्पयामि ॐ
शेखपादरं तर्पयामि ॐ नामकं तर्पयामि ॐ मामकं तर्पयामि ॐ पाण्डरीं तर्पयामि ॐ तारकान्तं॰ ततो मू॰ चतु॰
र्थावरणात्मिकां श्रीमदेकजटादेवीं तर्पयामि ॐ ब्राह्मीं तर्पयामि ॐ माहेश्वरीं तर्पयामि ॐ कौमारीं तर्पयामि ॐ
वैष्णवीं तर्पयामि ॐ वैष्णवीं तर्पयामि ॐ वाराहीं तर्पयामि ॐ इन्द्राणीं तर्पयामि ॐ चामुण्डां तर्पयामि ॐ महा
लक्ष्मीं तर्पयामि ततो मूलान्ते पंचावरणात्मिकां श्रीमदेकदेकजटादेवीं तर्पयामि ॐ पद्मान्तकं तर्पयामि ॐ
यमान्तकं तर्पयामि ॐ विघ्नान्तकं तर्पयामि ॐ नरकान्तकं तर्पयामि ततो मूलान्ते षष्ठावरणात्मिकां श्रीमदेक
जटादेवीं तर्पयामि ॐ इन्द्रं तर्पयामि ॐ अग्निं तर्पयामि ॐ यमं तर्पयामि ॐ निर्ऋतिं॰ ॐ वरुणं॰ ॐ वायुं॰ ३५

ॐ कुबेरेण । ॐ ईशानेन तर्पयामि ॐ अनन्तेन । ॐ ब्रह्माणं तर्पयामि ततो मूलान्ते सप्तमावरणात्मिकां श्रीमदेकजटादे
वीं तर्पयामि वज्रेण तर्पयामि शक्तिना । दण्डेन । खड्गेन । पाशेन । अङ्कुशेन । गदया । त्रिशूलेन ।
चक्रेण । पद्मेन तर्प्य । सूर्येण । ह्रुं ह्रुं ततो मूलान्ते अष्टमावरणात्मिकां श्रीमदेकजटादेवीं तर्पयामि इत्यष्टमत
र्पणं अथ मध्यमः अथवा पीठशक्तीनां तर्पणं कृत्वा मूलेनाष्टोत्तरशतवारमष्टाविंशतिधारे वा अतर्प्ये षडङ्गदेव
तामात्रेण तर्पयेदिति ततो ह्रीं हंसः मार्तण्डभैरवाय प्रकाशशक्तिसहिताय इदमर्घ्यं स्वाहा इति सूर्यायार्घ्यं दत्वा सूर्य
मण्डले देवीं विभाव्य मूलान्ते उपचारादित्यमण्डलवर्तिन्यै शिववैतन्यमय्यै सपरिवारायै सहितायै श्रीमदेकजटादेव्यै इदमर्घ्यं स्वा
हेति मन्त्रेण रक्तचन्दनजवाकुसुमादिसहितं परिपूर्णेन ताम्रपात्रेण सूर्यमण्डलस्थायै देव्यै अर्घ्यं दद्यात् अथैवं कृत्वा मं
त्रस्यात्मनः स्थापयेद्वादिकं विधाय गुरुदेवतां नमस्कृत्वा शरणं देवीं स्मरणपूर्वकं स्नात्वा जलाशये गत्वा मलापकर्ष
णं स्नानं विधाय ॐ अपेत्यादि संकल्प्य देवात्मकं तेजोरूपं जले विभाव्य मूलमन्त्रं तु निमज्ज्य वमन् मूलेनाशिवो स्वाहा
त्रिः प्राणायामं कृत्वा दशकृत्वो गायत्रीं जप्त्वा मूलान्ते सांगां सायुधां सपरिवारां प्रदोष्यसहितां
श्रीमदेकजटादेवीं तर्पयामि स्वाहेति त्रिः संतर्प्य सूर्यायार्घ्यं दद्यात् इति तर्पणं अथ ध्यानं ... क्रम ...
प्रथमं वारि संस्थाप्य द्वाल पेद्रस्पादके शिवो वह्नि ततो यत्नात् संत्राव मननमाचरेत् १ द्वारस्थगुरुदेवीदिक्पाला

मं॰ र॰
त्वा॰
३८

मनसा न्यसेत् देवीति पायात् न्यासे कोपदष्टानि रीतिना २ सिद्धार्थैस्तिलसंमिश्रैर्भूतानुत्सारयेत्ततः सामान्यार्घ्यं वि
धायाथ द्वारदेवान्प्रपूजयेत् ३ इन्द्रादिके ग्रहीनाव विघ्नोत्सारणमाचरेत् ॐ रक्षेति जलसेकेन भूमिं संशोधयेत्ततः ४
शुभिमे अन्ततो भूमिं विशेषासनकेवले धाकारमनलस्थाप्य भावयन्कस्ततः ५ सीकृत्य विजयो शानः स्त्रावरेत्या
